International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(2): 94-101
© 2021 IJSR
www.anantaajournal.com
Received: 20-01-2021
Accepted: 28-02-2021

**डॉ. सीमा जैन**
असि. प्रोफेसर, सामान्य संस्कृत राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

**Corresponding Author:**
**डॉ. सीमा जैन**
असि. प्रोफेसर, सामान्य संस्कृत राज. महाराज आचार्य संस्कृत महाविद्यालय, जयपुर, राजस्थान, भारत

# माघकाव्ये वर्णव्यवस्था

**डॉ. सीमा जैन**

**प्रस्तावना**

भारतीयसंस्कृतौ वर्णानां महती भूमिका वर्तते। वर्णाश्चत्वार: सन्ति- ब्राह्मण:, क्षत्रिय:, वैश्य: शूद्रश्च। विभाजनमिदं कर्ममूलकम्। यथोक्तं भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम् –

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश:।
तस्य कर्त्तारमपि मां विद्ध्यकर्तारमव्ययम्।।[1]

सम्पूर्णमिदं जगदेकेनैव ब्रह्मणोत्पन्नम्। वर्णेषु कश्चिद्विशिष्टो भेदो नास्ति। वर्णभेदस्तु केवलं 'कर्मगत' इति।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य: कृत:।
ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रोऽजायत।।[2]

आदौ कर्ममूलकमिदं विभाजनं पश्चाद्वर्तिकाले जन्ममूलकं सञ्जातम्।
शिशुपालवधमहाकाव्ये महाकविमाघेन वर्णधर्माणां विस्तृतं विवेचनं प्रस्तुतम् –

**ब्राह्मणधर्म**

मनुस्मृत्यनुसारं ब्राह्मणस्य कर्त्तव्यानि यथा –

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्।।
षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाश्च प्रतिग्रह:।।[3]

माघकाव्ये महर्षिनारदस्य स्वरूपं धर्मशास्त्रे ब्राह्मणवर्णनानुसारमेव चित्रितं कविना। यथा –

दधानमम्भोरुहकेसरद्युतीर्जटा: शरच्चन्द्रमरीचिरोचिषम्।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव।।4
पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति।
सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम्।।5
विहङ्गराजाङ्गरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितन्तुभि:।
कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव।।6
अजस्त्रमास्फालितवल्लकीगुणक्षतोज्ज्वलाङ्गुष्ठनखांशुभिन्नया।
पुर: प्रवालैरिव पूरितार्धया विभान्तमच्छस्फटिकाक्षमालया।।7

ब्राह्मणो लोककल्याणभावनया अध्ययनाध्यापनं कुर्वन् समाजस्य नेतृत्वं करोति। महाकाव्येऽस्मिन् महर्षिनारदमाध्यमेन माघो ब्राह्मणधर्मस्य विन्यास: करोति। श्रीकृष्णोऽपि नारदमभिवादयन् ब्राह्मणस्य स्वरूपमेव निर्दिशति –

हरत्यघं सम्प्रति हेतुरेष्यत: शुभस्य पूर्वाचरितै: कृतं शुभै:।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्।।8

अर्थाद् भवदीयदर्शनं शरीरभाजांद्रष्टृमित्यर्थ:। कालत्रितये भूतादिकालत्रितयेऽपि योग्यतां पवित्रतां व्यनक्ति गमयति। कुत: संप्रति दर्शनकाले अघं पापं हरति। एष्यतो भाविन: शुभस्य श्रेयसो हेतु: तथा पूर्वाचरितै: प्रागनुष्ठितै: शुभै: सुकृतै: कृतम्। एवं त्रैकाल्येऽपि कार्यत्वेन कारणत्वेन च पुंसि सुकृतसमवायमवगमयते। अत एतादृशं दर्शनं कस्य न प्रार्थ्यमिति भाव:। ब्राह्मणं प्रति राज्ञो व्यवहारस्य निर्देशनमपि महर्षिनारदस्य स्वागतप्रसङ्गे कवि: करोति यथा –

गतस्पृहोऽप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यया।
तनोति नस्तामुदितात्मगौरवो गुरुस्तवैवागम एष धृष्टताम्।।9

गतस्पृहो विरक्तोऽपि त्वमागमनप्रयोजनं वदेति वक्तुं यया धृष्टतया व्यवसीयत उद्यम्यते। उदितमुत्पन्नमुक्तं वा आत्मनो मम गौरवं येन स: गुरु: श्लाघ्य एष तवागम आगमनमेव नोऽस्माकं धृष्टतां तनोति विस्तारयति। भवतो निस्पृहत्वेऽपि प्रेक्षावत्प्रवृत्ते: प्रयोजनव्याप्त्या सावकाश: प्रश्न इति भाव:। रैवतकपर्वतवर्णनप्रसङ्गेऽपि कवि:उपमामाध्यमेन ब्राह्मणानां वैशिष्ट्यं प्रदर्शयति यथा –

विद्वद्भिरागमपरैर्विवृतं कथञ्चिच्छ्रुत्वापि
दुर्ग्रहमनिश्चितधीभिरन्यै:।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं गूढार्थमेष निधिमन्त्रगणं बिभर्ति।।10

एषोऽद्रि: श्रेयान् श्रेष्ठो द्विजातिर्ब्राह्मण एव आगमो निधिकल्पोमन्त्रशास्त्रञ्च स एव परं प्रधानं येषां तैरागमपरैर्विद्वद्भिर्निधीनां मन्त्राणाञ्च साधनविधानज्ञै: कथञ्चिद्विवृतं स्वरूपत: प्रकाशितम्। नास्ति निश्चिता इदमित्थमिति निश्चयात्मिका धीर्येषां तैरनिश्चितधीभिरन्यैरशास्त्रज्ञै: श्रुत्वापि इह निधिरस्ति ईदृङ्महिमा असौ मन्त्र इति चाप्तमुखादाकर्ण्यापि दुर्ग्रहं दु:साधनम्। अघानि दुखान्येनांसि च हन्तुं दक्षं समर्थम्। गूढ: संवृतोऽर्थो धनमभिधेयञ्च यस्मिंस्तं गूढार्थम्। निधयो मन्त्रा इव, अन्यत्रनिधय इव मन्त्रास्तेषां गणं बिभर्ति द्विजातिर्मन्त्रगणमिव निधिगणमेष बिभर्तीत्युपमार्थ:।
अधोलिखितपद्ये महाकविर्माघो यमनियमानां सङ्केतं करोति। यमनियमानां पालनं ब्राह्मणस्य प्रमुखो धर्म:। यथा –

वशिनं क्षितेरयनयाविवेश्वरं नियमो यमश्च नियतं यतिं यथा।
विजयश्रिया वृतमिवार्कमारुतावनुसस्त्रतुस्तमथ दस्त्रयो: सुतौ।।11

अत्र "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा:" "शौचसंतोषतप:स्वाध्याये-श्वरप्रणिधानानि नियमा:" च सङ्केतिता:।
वर्णव्यवस्थायां प्रत्येकं वर्णस्य कानिचन प्रमुखानि कर्त्तव्यान्यवर्तन्त। तानि कर्तव्यान्यनुपालयन् स: वर्ण: समाजे प्रतिष्ठाभाग्भवति स्म।

मनुस्मृत्यनुसारम् अध्ययनम्-अध्यापनं-यजनं-याजनं-दानं-प्रतिग्रहश्चेति षट् कर्माणि ब्राह्मणस्य कल्पितान्यासन्।। एतेषु षड्सु अध्ययनं-यजनं-दानमित्येतानि त्रीणि क्षत्रिय-वैश्ययोरपि अनिवार्यकर्माण्यासन्। किन्त्ववशिष्टानि त्रीणि अध्यापनं-याजनं-प्रतिग्रहश्चेत्यिमानि ब्राह्मणस्यैवासन्। सर्वोऽपि ब्राह्मणो 'अध्ययनं-यजनं-दानम्' इत्येतै: कर्मभिरात्मोन्नतिं विन्दन्, 'अध्यापनं-याजनं-प्रतिग्रह:' चेत्येभि: कर्मभि: समाजोन्नत्या सहात्मोन्नतिं प्राप्नोति स्म। अध्ययनाध्यापनयजनयाजनदृष्ट्या पद्यमिदम- वलोकनीयम्-

शुद्धमश्रुतिविरोधि बिभ्रतं शास्त्रमुज्ज्वलमवर्ण-सङ्करै:।
पुस्तकै: सममसौ गणं मुहुर्वाच्यमानमशृणोद्द्विज-जन्मनाम्।।12

अर्थादसौ नृप: शुद्धमाचारपूतं श्रुतिविरोधि वेदविरुद्धं न भवतीत्यश्रुतिविरोधि शास्त्रं बिभ्रतमात्मनि धारयन्तम्। सकलवैदिकशास्त्राभिज्ञमित्यर्थ:। अन्यत्र श्रुत्यविरोधिभि: पुराणादिभि:। वाच्यमानमन्वयगुणादिक्रमेण प्रस्तूयमानम्, अन्यत्रवाच्यमानैर्द्विजगणेन व्याख्यायमानैरित्यर्थ:। द्विजन्मनां ब्राह्मणानां गणमवर्णसङ्करैरसङ्कीर्णाक्षरै:, अन्यत्र जातिसंकररहितमिति विपरिणाम:। पुस्तकै: समं पुस्तकाक्षरैर्वाक्यै: सह अश्रृणोत्। दानकाले प्रत्येकं ब्राह्मणानां गुणान् गोष्ठीश्च श्रुतवान् इत्यर्थ:।

अपि च –

शब्दितामनपशब्दमुच्चकैर्वाक्यलक्षणविदोऽनुवाक्यया।
याज्यया यजनकर्मिणोऽत्यजन्द्रव्यजातमपदिश्य देवताम्।।[13]

वाक्यलक्षणविदो मीमांसाशास्त्रज्ञा:। यजनव्यापारवन्त ऋत्विजो अनुवाक्यया मन्त्रवर्णेनोच्चै: प्रकाशितां देवतामिन्द्रादिकामपदिश्य पशुपुरोडाशादि हवि: समूहं यागाङ्गसाधनऋचा अत्यजन्। अधोलिखितपद्ये कवि: अर्घ्यार्हाणां निरूपणं करोति –

स्नातकं गुरुमभीष्टमृत्विजं संयुजा च सह मेदिनीपतिम्।
अर्घभाज इति कीर्तयन्ति षट् ते च ते युगपदागता: सद:।।[14]

अर्थात् स्नातको गृहस्थविशेषस्तम्, गुरुं पित्रादिकम्, अभीष्टमिष्टबन्धुम्, ऋत्विजं याजकम्, संयुज्यत इति संयुक् सम्बन्धी जामाता तेन सह मेदिनीपतिं राजानं च। षडेतेऽर्घभाज: पूजार्हा इति कीर्तयन्ति कथयन्ति।

क्षत्रियधर्म:

राजधर्मस्य विवेचनं विविधग्रन्थेषु प्राप्यते। महाकविमाघेन प्रजाहितरक्षणं राज्ञो विशेषाधिकारांश्च विचार्य यस्या राजतन्त्रसमर्थिकाया राजनीते: चर्चा स्वकीयमहाकाव्ये कृता, सा भारतीयसभ्यतासंस्कृति-परम्परानुकूलैव। राजनीते: जटिलग्रन्थिषु तेषां प्रसङ्गानुकूलविचारान् दृष्ट्वा कथितुं शक्यते यत्तेषां ज्ञानं पुस्तकीयज्ञानमात्रमेव न। शिशुपालवधस्य द्वितीयसर्ग: कवे: राजनीतिशास्त्रज्ञताया: प्रमाणमस्ति। धर्मशास्त्रानुसारं क्षत्रियवर्णस्य कर्माणि अधोनिर्दिष्टानि सन्ति –

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासत:।।[15]

क्षत्रियवर्णस्य प्रमुखेषु कर्त्तव्येषु अध्ययनं यजनं दानञ्चेति त्रयो धर्मा ब्राह्मणतुल्या एव। परं विशिष्टं कर्मास्ति 'प्रजापालनम्'। क्षत्रियाभावे जगदिदमरक्षितं सन् रसातलं गतं स्यादिति च तन्महत्त्वं महाभारते वर्णितम्। चतुर्णामपि वर्णानां कर्तव्यनिर्वाहस्य भारो राज्ञो भवति स्म। राजा आत्मनो धर्मरक्षणमितरवर्णानां धर्मरक्षणञ्च कर्तुं 'वर्णाश्रमव्यवस्थां' नियन्त्रयति स्म। एवं क्षत्रियो धर्मज्ञ:, प्रजारक्षको वर्णाश्रमाणां गुरुश्चेति जनै: कीर्त्यते स्म।

तदनुसारं शिशुपालवधे क्षत्रियधर्मस्य सुन्दरनिरूपणं प्राप्यते। निम्नलिखितपद्येषु राजनीतिमाध्यमेन क्षत्रियस्य कर्त्तव्यानि निरूपितानि। यथा –

उत्तिष्ठमानस्तु परो नोपेक्ष्य: पथ्यमिच्छता।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामय: स च।।[16]

हितमारोग्यं चेच्छता पुंसा शत्रु: नोपेक्ष्यो यतो हि वर्धिष्यमाणौ व्याधि: शत्रुश्च शिष्टै: समौ आम्नातौ। अनेकत्र राजनीतिविषयकपारिभाषिकशब्दा: प्रयुक्ता: कविना। यथा –

षड्गुणा: शक्तयस्तिस्त्र: सिद्धयश्चोदयास्त्रय:।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्।।[17]

गुणा: सन्धिविग्रहयानासनाद्वैधीभावसमाश्रयाख्या: षट्। तत्रारिविजिगीष्वोर्व्य- वस्थाकरणमैक्यं सन्धि:। विरोधो विग्रह:। विजिगीषोररिं प्रति यात्रा यानम्। तयोर्मिथ: प्रतिबद्धशक्त्यो: कालप्रतीक्षया तूष्णीमवस्थानमासनम्। दुर्बलप्रबलयोर्वा- चिकमात्मसमर्पणं द्वैधीभाव:। अरिणा पीड्यमानस्य बलवदाश्रयणं संश्रय:। शक्तय: प्रभुत्वमन्त्रोत्साहाख्यास्तिस्त्र:। कोशदण्डोत्थितेज: प्रभाव:। कर्त्तव्यार्थेषु स्थेयान् प्रयत्न उत्साह:। षड्गुणचिन्तनं मन्त्र:। सिद्धय: पूर्वोक्तशक्तित्रयसाध्या: पुरुषार्थलाभात्मिका। ताश्च तिस्त्र: प्रभुसिद्धिर्मन्त्रसिद्धिरुत्साहसिद्धिश्चेति। उदया वृद्धिक्षयस्थानानि। तत्र वृद्धिक्षयौ स्वशक्तिसिद्ध्यो: पूर्वावस्थानादुपचयापचयौ, स्थानं ते च त्रय इति।

सर्वकार्यशरीरेषु मुक्त्वाऽङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्।।[18]

कर्मणामारम्भोपाय:, पुरुषद्रव्यसम्पद्, देशकालविभाग:, विपत्तिप्रतीकार:, कार्यसिद्धिश्चेति पञ्चाङ्गानि। राज्ञामङ्गपञ्चकातिरिक्तो मन्त्रो नास्ति।

मन्त्रभेदे कार्यहानिर्भवतीति सङ्केतयन् कथयति कवि: -

मन्त्रो योध इवाधीर: सर्वाङ्गै: संवृतैरपि।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया।।[19]

उत्साहशक्ते: महत्त्वं वर्णयन् द्वादशराज्ञां विवेचनं करोत्युद्धव: -

उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि।
जिगीषुरेको दिनकृदादित्येष्विव कल्पते।।[20]

जिगीषुरेक एव द्वादशस्वपि राजसु मध्ये द्वादशस्वादित्येषु दिनकृद्यो दिनकरणे व्याप्रियमाण आदित्य:। स इव ईहामुत्साहमत्यजन् प्रयुञ्जान एव। न तु निरुद्योग इति भाव:। उदेतुं कल्पते उदयाय प्रभवति। उत्साहशक्तिरेव प्रभुशक्तेरपि मूलमित्यर्थ:। द्वादशराजान एते सन्ति –

'अरिमित्रमरेर्मित्रं मित्रामित्रमत: परम्।
तथारिमित्रमित्रं च विजिगीषो: पुरस्सरा:।।' पञ्चेतिशेष:।
'पार्ष्णिग्राहास्तत: पश्चादाक्रन्दस्तदनन्तरम्।
आसारावनयोश्चेव विजिगीषोस्तु पृष्ठत:।।'

पार्ष्णिग्राहासार आक्रन्दासारश्चेत्यर्थ:। अत्र चत्वार इति शेष:। एवं नव भवन्ति। विजिगीषुर्दशम:। 'अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तर:। अनुग्रहे संहतयो: समर्थो व्यस्तयोर्वधे। मण्डलाद्बहिरेतेषा-मुदासीनो बलाधिक:।।' इति मध्यमोदासीनाभ्यां सह द्वादश वेदितव्या:।

एवमेव–
यातव्यपार्ष्णिग्राहादिमालायामधिकद्युति:।
एकार्थतन्तुप्रोतायां नायको नायकायते।।[21]

राज्ञो लक्षणं वर्णयति कवि: -

बुद्धिशस्त्र: प्रकृत्यङ्गो घनसंवृतिकञ्चुक:।
चारेक्षणो दूतमुख: पुरुष: कोऽपि पार्थिव:।।[22]

बुद्धिरेव शस्त्रं यस्य स बुद्धिशस्त्र:। अमोघपातित्वात्तस्या इति भाव:। प्रकृतय: स्वामिमन्त्रिमित्रकोषराष्ट्रदुर्गसेनाश्चेति राज्याङ्गानि। ता एवाङ्गानि यस्य स:। तद्वैकल्ये राज्ञो वैकल्यं स्यादिति भाव:। घना दुर्भेदा संवृतिर्मन्त्रगुप्तिरेव कञ्चुक: कवचो यस्य स तथोक्त:। मन्त्रभेदे राज्यभेदादिति भाव:। चारो गूढपुरुष एवेक्षणं चक्षुर्यस्य स चारेक्षण:। अन्यथास्वपरमण्डलवृत्तान्ता-दर्शनात्। दूत: सन्देशहर एव मुखं वाग्यस्यासौ दूतमुख:। अन्यथा मूकस्येव वाग्व्यवहारासिद्धौ तत्साध्यासाध्यकार्यप्रतिबन्ध: स्यादिति भाव:। एवम्भूत: पार्थिव: कोऽपि पुरुषोऽन्य एवायम्। लोकविलक्षण: पुमानित्यर्थ:। अतो राज्ञा बुद्ध्यादिसम्पन्नेन भवितव्यम्। एतदेवाप्रमत्तत्वम्। अन्यथा स्वरूपहानि: स्यादिति भाव:। तन्त्रावापयो: सङ्केत: प्राप्यते –

तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रव:।।[23]

तन्त्रावापौ स्वपरराष्ट्रचिन्तनम्। अन्यत्र तन्त्रावापं शास्त्रौषधप्रयोगञ्च वेत्ति यस्तेन तन्त्रावापविदा। 'तन्त्रं स्वराष्ट्रचिन्तायामावाप: परचिन्तने। शास्त्रौषधान्तमुख्येषु तन्त्रम्' इति वैजयन्ती। योगै: सामाद्युपायै: अन्यत्र देवताध्यानैश्च। 'योग: सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमर:। मण्डलानि स्वपरराष्ट्राणि, माहेन्द्रादिदेवतायतनानि च अधितिष्ठताऽतिक्रमता नरेन्द्रेण राज्ञा, विषवैद्येन च। 'नरेन्द्रो वार्तिके राज्ञि विषवैद्ये च कथ्यते' इति विश्व:। शत्रव: फणीन्द्रा इव सुनिग्रहा: सुखेन निग्राह्या:।
'प्रजानां रक्षणम्' इति वचनानुसारं प्रजापालनमेव क्षत्रियस्य प्रधानकर्त्तव्यम्। तस्य सङ्केत: समासोक्तिमाध्यमेन प्राप्यते –

क्षणमयमुपविष्ट: क्ष्मातलन्यस्तपाद:,
प्रणतिपरमवेक्ष्य प्रीतमह्राय लोकम्।
भुवनतलमशेषं प्रत्यवेक्षिष्यमाण:
क्षितिधरतटपीठादुत्थित: सप्तसप्ति:।।[24]

अयं सप्तसप्तितिरर्क: क्षणमुपविष्ट: क्षितिधरपीठध्यासीन: क्ष्मातलन्यस्तपाद: प्रणामस्वीकाराय भूतलप्रसारिताङ्घ्रिरित्यर्थ:। प्रणतिपरं नमस्कारं कुर्वाणं प्रीतं प्रणामस्वीकारात् संतुष्टं लोकं जनमह्नाय झटित्यवेक्ष्य। रूपावलोकेन संभाव्याशेषं भुवनतलं लोकस्वरूपं प्रत्यवेक्षिष्यमाणोऽनुसंधास्यमान: क्षितिधरस्य तटं पीठमिव सिंहासनमिव। अन्यत्र तटमिव पीठं तस्मादुत्थित:। उदयाद्रिमतिक्रान्त इत्यर्थ:। यथा कस्मिन्महाराज: सिंहासनोपनिविष्ट: क्षणं प्रणतजन्मादृत्य अथ सकलस्वराष्ट्रप्रत्यवेक्षणाय सहसोत्थाय गच्छति तद्वदित्यर्थ:। सत्पात्राय दानं भारतीयसंस्कृते: वैशिष्ट्यमस्ति। प्रसङ्गेऽस्मिन् पद्यमिदं महत्त्वपूर्णमस्ति-

स्वापतेयमधिगम्य धर्मतः पर्यपालयमवीवृधं च यत्।
तीर्थगामि करवै विधानतस्तज्जुषस्व जुहवानि चानले।।25

यत्स्वपतौ स्वामिनि साधु तत् स्वापतेयं वित्तम्। धर्मतः क्षत्रियस्य विजितमिति शास्त्रोक्तप्रकारादित्यर्थः। अधिगम्य लब्ध्वा यत्नेन पर्यपालयं पालितवान्, अवीवृधं वृद्धिं च प्रापितवान्। तत्तीर्थगामि विप्राधीनं करवै करिष्यामि। विधानतः 'पालितं वर्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्'(याज्ञ.आ. 317) इति। तच्च पात्रं त्वमेवेत्याह-तत्सर्वं जुषस्व सेवस्व। अनले जुहवानि च जुहुयाम्।
प्रजापालनेन सह यजनमपि क्षत्रियाणां कर्त्तव्यम्। राज्ञा युधिष्ठिरेणापि राजसूययज्ञस्यायोजनं कृतम्। तदेव वर्णयता कविनोक्तम् –

आननेन शशिनः कलां दधद्दर्शनक्षयितकामविग्रहः।
आप्लुतः स विमलैर्जलैरभूदष्टमूर्तिधर-मूर्तिरष्टमी।।26

आननेन शशिनः कलामिव कलां कान्तिं दधत् शशिमुख इत्यर्थः। अन्यत्र शशिखण्डधरेत्यर्थः। दशनेन ज्ञानेन क्षयितौ नाशितौ कामविग्रहौ कामक्रोधौ येन सः, अन्यत्र दृष्टिदग्धस्मरशरीरः। विमलैर्जलैः आप्लुतः स्नातः। नद्यां स्नातीति दीक्षायां स्नानविधानादिति भावः। अन्यत्र गङ्गोदकसिक्ता। गङ्गाधरीत्यर्थः। स नृपो अष्टानां पूरणी अष्टमी। अष्टानां मूर्तीनां समाहारोऽष्टमूर्तिः। तस्य धरो धारयिताऽष्टमूर्तिधरः शिवः तस्याष्टमी मूर्तिरभूत्।
राज्यसम्बन्धिविविधविषयाणां विचारार्थं ब्राह्ममुहूर्त एवोपयुक्त इति सङ्केतयति कविः -

क्षणशयितविबुद्धाः कल्पयन्तः प्रयोगा-
नुदधिमहति राज्ये काव्यवद्दुर्विगाहे।
गहनमपररात्रप्राप्तबुद्धिप्रसादाः
कवय इव महीपाश्चिन्तयन्त्यर्थजातम्।।27

क्षणं शयिता विसुप्ता विबुद्धाः तदैव प्रबुद्धाः। यथाकालं प्रबुद्धत्वादिति भावः। क्षणशयितविबुद्धाः। महीपाः कवय इव अपररात्रे प्राप्तबुद्धिप्रसादा लब्धबुद्धिप्रकाशाः सन्त उदधिमहति समुद्रगम्भीरे। एकत्र तुरगादिभिरपरत्र रसभावादिभिश्चेति भावः। अत एव दुर्विगाहे दुष्प्रवेश्ये राज्ये काव्ये इव काव्यवत्। प्रयोगान् सामाद्युपायानुष्ठानानि, अन्यत्रार्थगुणसाधुशब्दगुम्फान् कल्पयन्तस्तर्कयन्तः 'ब्राह्मे मुहूर्त उत्थाय चिन्तयेदात्मनो हितम् (याज्ञ. आचा. अ. 115) इति स्मरणादिति भावः। गहनं दुष्प्रापमन्यत्र दुर्दर्शमर्थजातं पुरुषार्थजातं त्रिवर्गमित्यर्थः। अन्यत्र वाच्यलक्ष्यव्यङ्ग्यरूपमभिधेयजातं चिन्तयन्ति विचारयन्ति।
एवं महाकविना क्षत्रियाणां प्रमुखकर्त्तव्यानां वर्णनं कथामाध्यमेन कृतम्।

वैश्यधर्मः
शिशुपालवधमहाकाव्यस्य कथावस्तुनि संक्षिप्तरूपेण वैश्यधर्मस्य निरूपणं कृतं महाकविना। धर्मशास्त्रीयग्रन्थेषु वैश्यधर्मस्य निरूपणं प्राप्यते। यथाह मनुस्मृतिकारः -

पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च।।28

गीतायामप्युक्तम् –

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।29

वैश्यः पशूनां रक्षणं, वाणिज्यं, यजनं, दानं वेदाध्ययनञ्चेति कर्माणि कुर्वन् धनसमृद्ध्या, अन्नसमृद्ध्या च राष्ट्रपालने सहयोगं कुर्यात्। 'यदि न स्युस्तथा वैश्या न भवेयुस्तथा परे' इति वैश्यवर्णेनैव राष्ट्रस्यार्थिकस्थितिः सुदृढा भवति। वैश्याः सततं धनार्जनपराः स्युः, अधर्मेण मार्गेण धनार्जनञ्च न कुर्युरित्यतो वेदाध्ययनं, यजनं, दैवताराधनं, दानं, ब्राह्मणानामादर इत्येवं सदाचारैरुपदिश्यन्ते।'चतुर्षु वर्णेषु वैश्यवर्णस्यैव लोकोदरपूरणभारोऽस्ति। ब्राह्मणेभ्यो दानरूपेण, क्षत्रियेभ्यः कररूपेण शूद्रेभ्यः पारिश्रमिकरूपेण च यत्किञ्चिदपि ददत् सर्वेषामुदराणि पूरयत्यसौ।
शिशुपालवधे वैश्यधर्मनिरूपकान्युदाहरणानि प्राप्यन्ते। प्रस्तुतपद्येषु वाणिज्यस्य निरूपणं कृतं महाकविना। अन्यदेशेभ्य आगतानां व्यापारिणां वर्णनं यथा-

विक्रीय दिश्यानि धनान्युरूणि द्वैप्यानसावुत्तमलाभभाजः।
तरीषु तत्रत्यमफल्गुभाण्डं सांयात्रिकानावपतोऽभ्यनन्दत्।।30

दिक्षु भवानि दिश्यानि दिगन्तरानीतानीत्यर्थः। उरूणि महान्ति धनानि नानाद्रव्याणि विक्रीय मूल्येन दत्त्वोत्तमलाभं द्वैगुण्यादिकं भजन्तीति तानुत्तमलाभभाजः। तत्रत्यं द्वैप्यमफल्गु सारवद्भाण्डं मूलधनं पण्यद्रव्यमित्यर्थः। तरीषु नौषु आवपत आदधतो द्वैप्यान् समुद्रद्वीपवासिनः। संयात्रा सम्भूय यात्रा सा प्रयोजनमेषां तान् सांयात्रिकान् पोतवणिजः। असौ हरिरभ्यनन्दयत्। अनेन

वस्तूनामायातनिर्यातस्य सङ्केता: प्राप्यन्ते। पण्यवीथिकास्थापनाया वर्णनं प्राप्यते। यथा –

यावत्स एव समय: सममेव तावदव्याकुला: पटमयान्यभितो वितत्य।
पर्यापतत्क्रयिकलोकमगण्यपण्यपूर्णापणा विपणिनो विपणीर्विभेजु:।।[31]

वणिजो यावत् स एव समय: सेनानिवेशलक्षण एव तावत्क्षण एव समं युगपदव्याकुला अव्यग्रा: सन्त: पटमयानि पटविकाराणि पटमण्डपानीत्यर्थ:। अभितो वितत्य उभयत: श्रेण्या वितत्य विस्तीर्य क्रयेण जीवतीति क्रयिक:। पर्यापतन् परितो धावन् क्रयिकलोक: क्रेतृजनो यस्मिन् कर्मणि अगण्यैरसंख्येयै: पण्यै: पण्यद्रव्यै: पूर्णा आपणा: पण्यप्रसारणस्थानानि यासु ता विपणी: पण्यवीथी: विभेजु: निर्ममु:।
चतुरवणिज: छलप्रपञ्चेनापि धनसंग्रहं कुर्वन्ति स्म इत्येवं सङ्केतयति श्लोकोऽयम्-

उपजीवति स्म सततं दधत: परिमुग्धतां वणिगिवोडुपते:।
धनवीथिवीथिमवतीर्णवतो निधिरम्भसामुपचयाय कला:।।[32]

अम्भसां निधि: समुद्रो वणिगिव सततं परिमुग्धतां सौन्दर्यम्, अन्यत्र मौढ्यम्। व्यवहारानभिज्ञतामिति यावत्। दधतो दधानस्य धनानां वीथिर्धनवीथिरन्तरिक्षं सा वीथि: पण्यवीथिरिवेत्यु-पमितसमास:। तामवतीर्णवत: प्रविष्टवत उडुपतेर्नक्षत्रनाथस्य कस्यचिद्धनिकवणिजश्च कला: षोडशांशान्मूलधनवृद्धीश्च उपचयाय स्वाम्बुद्धये समृद्धये चोपजीवति स्म सेवते स्म। अन्यत्र लभते स्मेत्यर्थ:। यथा क्रियादिकुशलो ह्यकुशलान्महान्तं लाभमाप्नोति तद्वदिति भाव:। एवमेव समासोक्तिमाध्यमेन लवणव्यापारिणां वर्णनं यथा –

लीलयैव सुतनोस्तुलयित्वा गौरवगाढ्यमपि लावणिकेन।
मानवञ्चनविदा वदनेन क्रीतमेव हृदयं दयितस्य।।[33]

लावण्यं कान्तिविशेषोऽस्यास्तीति लावणिकं लावण्यवत्। अन्यत्र तु लवणं पण्यमस्यास्तीति लावणिको लवणव्यवहारी। तेन लावणिकेन मानवञ्चनविदाऽहङ्कारहरणदक्षेण, अन्यत्र परिमाणप्रतारणपटुना सुतनो: स्त्रिया वदनेन कर्त्रा गौरवगाढ्यं गाम्भीर्यसम्पन्नमपि, अन्यत्र गुरुत्वयुक्तमपि दयितस्य हृदयं लीलया विलासेनैव तुलयित्वा, अन्यत्रानायासेनैवोन्माय गुर्वपि लघुतया मीत्वेत्यर्थ:। क्रीतं वशीकृतमेव अन्यत्र दानेन स्वीकृतमेव।
लाभार्थं क्रीते मद्यभाण्डे विनष्टे सति वणिज: शोकस्य निदर्शनमेवं प्राप्यते –

धूर्भङ्गसंक्षोभविदारितोष्ट्रिकागलन्मधुप्लावितदूरवर्त्मनि।
स्थाणौ निषिङ्गण्यनसि क्षणं पुर: शुशोच लाभाय कृतक्रयो वणिक्।।[34]

पण्यवीथिकां गत: चतुरग्राहक: साधारणमूल्येनापि उत्तमवस्तु क्रीणातीति सङ्केतयति कवि:

रोदोरन्ध्रं व्यश्नुवानानि लोलैरङ्गस्यान्तर्मापितै: स्थावराणि।
केचिद्गुर्वीमेत्य संयन्निषद्यां क्रीणन्ति स्म प्राणमूल्यैर्यशांसि।।[35]

अर्थात् केचिद्वीरा गुर्वीं महतीं संयतो युध एव निषीदन्त्यस्यामिति निषद्यामापणमेत्य प्राप्य देहस्यान्तरभ्यन्तरे मापितै: परिच्छिन्नै: लोलैरस्थिरै: प्राणैरेव मूल्यै: प्राणमूल्यै: रोदसोर्द्यावापृथिव्यो रन्ध्रमन्तरालं व्यश्नुवानानि व्याप्नुवन्ति स्थावराणि यशांसि क्रीणन्ति स्म।
वाणिज्येन सहैव कृषिरपि वैश्यवर्णस्य प्रमुखकर्म। कृषिकर्मणोऽपि विवेचनं कविना कृतम्। रूपकमाध्यमेन बीजवपनप्रक्रियाया: चित्रणं यथा –

वारिपूर्वमखिलासु सत्क्रियालब्धशुद्धिषु धनानि बीजवत्।
भावि बिभ्रति फलं महद्द्विजक्षेत्रभूमिषु नराधिपोऽवपत्।।[36]

एवमेव सस्यरक्षणस्य वर्णनं प्राप्यते। यथा –

स व्रीहिणां यावदपासितुं गता: शुकान्मृगैस्तावदुपद्रुतश्रियाम्।
कैदारिकाणामभित: समाकुला: सहासमालोकयति स्म गोपिका:।।[37]

यावच्छुकान् कीरानपासितुं गतास्तावन्मृगैरुपद्रुतश्रियामुपद्रुतसम्पदां व्रीहिणां व्रीहिमतां कैदारिकाणां क्षेत्रसमूहानाम्। गोपिका गोप्त्रीरभित: समाकुला व्यग्रा:। उभयत: समाकृष्यमाणा: सतीरित्यर्थ:। स हरि: सहासमालोकयति स्म।
धान्यपवनार्थं वायो: प्रतीक्षां कुर्वन्ति कृषका:। अस्यैव निदर्शनं यथा –

सम्भृतोपकरणेन निर्मलां कर्तुमिष्टिमभिवाञ्छता मया।
त्वं समीरण इव प्रतीक्षित: कर्षकेण वलजान्पुपूषता।।[38]

पशुपालनस्यापि सङ्केताः प्राप्यन्ते। गोदोहस्य वर्णनं यथा –

प्रीत्यानियुक्तांल्लिहती स्तनन्धयान्निगृह्य पारीमुभयेन जानुनोः।
वर्धिष्णुधाराध्वनि रोहिणाः पयश्चिरं निदध्यौ दुहतः स गोदुहः।।39

नियुक्तान्वामपादे एव संयतान् वत्सान् प्रीत्या लिहतीः रोहिणीर्गाः पयः क्षीरं जानुनोरुभयेन जानुद्वयेन पारीं दोहनपात्रीं निगृह्य निरुध्य वर्धिष्णुधाराध्वनि वर्धनशीलक्षीरधाराशब्दं यथा भवति तथा दुहतः प्रपूरयतः गोदोहकान् स हरिश्चिरं निदध्याववलोकयति स्म। एवमेव –

अभ्याजतोऽभ्यागततूर्णतर्णकान्निर्याणहस्तस्य पुरो दुधुक्षतः।
वर्गाद्गवां हुङ्कृतिचारु निर्यतीमरिर्मधोरैक्षत गोमतल्लिकाम्।।40

दधिमन्थनस्य वर्णनमपि पशुपालनं सङ्केतयति –

द्रुततरकरदक्षाः क्षिप्तवैशाखशैले दधति दधनि धीरानारवान्वारिणीव।
शशिनमिव सुरौघाः सारमुद्धर्तुमेते कलशिमुदधिगुर्वीं बल्लवा लोडयन्ति।।41

द्रुततरकरा अतिलघुहस्तास्ते च ते दक्षाश्च बल्लवा गोपालाः। विशाखाप्रयोजनमस्येति वैशाखो मन्थनदण्डः। वैशाखः शैल इवेत्युपमितसमासः। साहचर्यात्क्षिप्तो वैशाखशैलो यस्मिन्। धीरान् गम्भीरानारवान् दधति दधनि दध्नि वारिणीव सुरौघाः शशिनमिव सारं नवनीतमुद्धर्तुमुत्क्रष्टु-मुदधिरिव गुर्वीं कलशिं कुम्भीमेते लोडयन्ति मथ्नन्ति।

एतदतिरिक्तं गजाश्वोष्ट्रादिपशूनामपि वर्णनं कृतं कविना। एवं शिशुपालवधे वैश्यवर्गस्य कार्यव्यापाराणां सम्यग्वर्णनं प्राप्यते।

शूद्रधर्मः

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।42

इति भगवद्वचनेन परिचर्यात्मककर्मणा जीविकानिर्वहणमेव शूद्रवर्णस्य प्रमुखकर्म। अपि च –

शुश्रूषा च द्विजातीनां शूद्राणां धर्म उच्यते।
भैक्ष्यहोमव्रतैर्हीनास्तथैव गुरुवासिताः।।43

इति महाभारतश्लोकेन शूद्रवर्णस्य धर्मः स्पष्टीभवति। द्विजातिहितमाचरन्, अध्ययनं भैक्ष्यं यजनं व्रतानि च न कुर्वन्, विनम्रभावसम्पन्नः, अहङ्कारवर्जितःशूद्रोऽनसूयया वर्णानां (ब्राह्मण-क्षत्रिय-वैश्यानाम्) शुश्रूषां कुर्यादिति भावः।

महाकविः पञ्चमसर्गे सूततनयस्य उल्लेखं करोति। शब्दोऽयं शूद्रवर्णस्य सङ्केतकः। शूद्रवर्णस्य कर्त्तव्यदृष्ट्या माघस्य पद्यमिदयमवलोकनीयम् –

यानाज्जनः परिजनैरवतार्यमाणा, राज्ञीनरापनयनाकुलसौविदल्लाः।
स्त्रस्तावगुण्ठनर्पटाः क्षणलक्ष्यमाणवक्त्रश्रियः सभयकौतुकमीक्षते स्म।।44

श्लोकेऽस्मिन् यानस्योल्लेखो वर्तते। यानवहनं शूद्रवर्णस्य कर्म। अनेन सहैव श्लोके परिजनानां सौविदल्लानाञ्च उल्लेखोऽस्ति येषां कर्म परिचर्या एव। एवमेव शिविरस्थापनाया वर्णनं कृतं कविना। तदपि शूद्रवर्णस्य कर्म। एकादशसर्गे वैतालिकानां गानं वर्णितम् –

श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः सततमृषभहीनं भिन्नकीकृत्य षड्जम्।
प्रणिजगदुरकाकुश्रावकस्निग्धकण्ठाः परिणतिमिति रात्रेर्मागधा माधवाय।।45

तत्रैव रक्षिणो वर्णनं कुर्वन् कविः कथयति –

प्रहरकमपनीय स्वं निदिद्रासतोच्चैः प्रतिपदमुपहूतः केनचिज्जागृहीति।
मुहुरविशदवर्णा निद्रया शून्यशून्यां दददपि गिरमन्तर्बुध्यते नो मनुष्यः।।46

राजसूययज्ञेऽपि भृत्यकर्म सङ्केतयति कविः

यस्तवेह सवने न भूपतिः कर्म कर्मकरवत्करिष्यति।
तस्य नेष्यति वपुः कबन्धतां बन्धुरेव जगतां सुदर्शनः।।47

एवं शिशुपालवधे यद्यपि प्रत्यक्षतः शूद्रवर्णस्य वर्णनं न प्राप्यते तथापि कथामाध्यमेन शूद्रवर्णस्य विभिन्नकर्त्तव्यानि निरूपितानि कविना।

## संदर्भ

1. श्रीमद्भगवद्गीता 4.13
2. ऋग्वेद 10.99.12
3. मनुस्मृति 1.88, 10.76
4. शिशु. 1.5

5. शिशु. 1.6
6. शिशु. 1.7
7. शिशु. 1.9
8. शिशु. 1.26
9. शिशु. 1.30
10. शिशु. 4.37
11. शिशु. 13.23
12. शिशु. 14.37
13. शिशु. 14.20
14. शिशु. 14.55
15. मनु. 1.89
16. शिशु. 2.10
17. शिशु. 2.26
18. शिशु. 2.28
19. शिशु. 2.29
20. शिशु. 2.81
21. शिशु. 2.92
22. शिशु. 2.82
23. शिशु. 2.88
24. शिशु. 11.48
25. शिशु. 14.9
26. शिशु. 14.18
27. शिशु. 11.6
28. मनुस्मृति: 1.90
29. श्रीमद्भगवद्गीता 18.44
30. शिशु. 3.76
31. शिशु. 5.24
32. शिशु. 9.32
33. शिशु. 10.38
34. शिशु. 12.26
35. शिशु. 18.15
36. शिशु. 14.34
37. शिशु. 12.42
38. शिशु. 14.7
39. शिशु. 12.40
40. शिशु. 12.41
41. शिशु. 11.8
42. श्रीमद्भगवद्गीता 18.44
43. महाभारतवनपर्व 150.36
44. शिशु. 5.17
45. शिशु. 11.1
46. शिशु. 11.4
47. शिशु. 14.16